International Research Journal of Humanities, Language and Literature
ISSN: (2394-1642)
Impact Factor 7.972 Volume 12, Issue 12, Dec 2025
Association of Academic Researchers and Faculties (AARF)
Website-www.aarf.asia, Email : editor@aarf.asia , editoraarf@gmail.com

# नेत्ररोगनिर्धारणे ज्योतिषशास्त्रस्य भूमिका

**प्रो. विश्वरञ्जनपतिः**
**आचार्यः विद्याशाखाप्रमुखश्च, ज्योतिषविद्याशाखा,**
**केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा**

पुरुषार्थचतुष्टयस्य प्राप्तिः मानवजीवनस्य परमलक्ष्यं भवति । तदर्थम् एकादशेन्द्रियाणां नियन्त्रणं करणीयम् । किन्तु रोगायतनम् शरीरं तथा 'शरीरं व्याधिमन्दिरम्' इति वचनानुसारं प्रत्येकस्य मानवस्य शरीरे भिन्नप्रकारका रोगाः विलसन्ति । यावत् शरीरं प्राणयुक्तं भवति तावत् रागोऽपि कदाचित् पत्यक्षेण कदाचित् प्रच्छन्नरूपेण भवति । अतः शरीरधारिणां मानवानां कृते रोगविषये सक्रियता परम् आवश्यकी वर्तन्ते ।

पञ्चज्ञानेन्द्रियेषु नेत्रस्य स्थानं सर्वाग्रगण्यम् । नेत्ररोगी नेत्रहीनः वा मनुष्यसमाने किमपि कार्य सुचारुरूपेण कर्तुमसमर्थः भवति । अतः नेत्रयो: सर्वेषु कार्येष उपयोगिता भवति ।

आयुर्वेदशास्त्रे ७६ प्रकारकाणां नेत्ररोगाणां वर्णनं कृतमस्ति। आधुनिकचिकित्सापद्धत्यानुसारेण अष्टप्रकारकाः नेत्ररोगाः भवन्ति । चिकित्सकाः वदन्ति भिटामिनं 'ए' इत्यस्याल्पता नेत्ररोगस्य मुख्यकारणम् । आयुर्वेदयोगादिशास्त्रैः साकं वेदाङ्गेषु नेत्रत्वेन प्रतिष्ठिते ज्योतिषशास्त्रे प्रमुखरूपेण पप्रकारकाः नेत्ररोगाः वर्णिताः सन्ति ।

ज्योतिषशास्त्रमाध्यमेन अस्माभिः ज्ञातुं शक्यन्ते यत् कः जनः कदा कुत्र केन प्रकारेण नेत्ररोगाग्रस्तः भविष्यति। ज्योतिषशास्त्रेण वयम् नेत्ररोगाणां निर्धारणं निवारणञ्च सम्यक्प्रकारेण कर्तुं शक्नुमः ।

**ज्योतिषशास्त्रे रागसम्बन्धिविचाराः -**

द्वादशभावेषु षष्ठस्थानं रोगस्थानमिति कथ्यते, तथापि सर्वेषां रोगाणां कृते रोगविषयकविचारावसरे षष्ठस्थानमेव न परिगण्यते, अपितु षष्ठस्थानं, षष्ठाधिपतिः, षष्ठे संपृक्तग्रहेत्यादयः सन्ति ।

**ज्योतिषशास्त्रोक्तनेत्ररोगाः योगाश्च –**

1. अन्धदियोगाः - यः नेत्राभ्यां रहितः स अन्धः इत्युच्यते । तथापि कश्चिद् जन्मना अन्धो भवन्ति। केचन अनन्तरे अन्धाः भवन्ति ।

**(क) जन्मान्धः -** सूर्यशुक्रलग्नेसंयुक्ताः त्रिकरयाः यदि भवेयुः तदा जन्मान्धयोगो जायते ।[1]

[1] **जन्मान्धः सार्कशुक्रस्तनु भवनपतिः स्यात्तदानीं मनुष्यः (जातकालं कारणभावः श्लोक - ४)**

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**(ख) पातान्धयोगः -** त्रिके चन्द्रारयोगे पातान्धः (जातकतत्त्वम्) चन्द्रमङ्गलयोः युति त्रिके भवेत्तदा जातक उच्चस्थानात् पतनाद् धत्वमुपयाति ।

**(ग) सेकान्धयोगः -** सेज्यन्दौ त्रिके सेकादन्धा इति । गुरुचन्द्रौ त्रिके भवेताम् पनादन्धत्वं ज्ञायते ।

**(घ) शाखान्धः -** चन्द्रबुधयोः युतिः त्रिके जाते सति जातकः शास्त्राध्यनादन्धः भवति ।[2]

2. **काणयोगाः**- यः मनुष्यः नेत्रेणान्धः स्याद् अर्थात् एकेन नेत्रेण द्रष्टमक्षमः स्याद् तदा सः काण इति नाम्ना जायते । ते निम्नलिखिता सन्ति । वामकाणयोगाः, दक्षिणकाणः, दम्पतीकाणश्चेति ।

**(क) वामकाणयोगाः -** भौमे द्वादशभावस्थे सति जातकः वामचक्षुरोगी भवति ।[3] व्ययभावस्थः चन्द्रः अशुभदष्टो यदि भवति चेत जातको वामचक्षुरोगी भवति ।[4] चन्द्राछक्राख्ये वा द्युने वामक्षि काणः चन्द्रः शुकौ यदि द्वादशे सप्तमभावे वा स्याताम् तथा पापग्रहैर्दृष्टौ तदा जातक वामनेत्रेण काणः स्यात् । यदि लग्नस्थः सप्तमध्ये वा सूर्यः शनिना पुनः दृष्टो वा भवेत् तदा तस्य जातकस्य शीघ्रमेव दक्षिणनेत्रं नश्यति तादृशः सूर्यः यदि राहुभौम्याभ्यां युतो भवेत् तदा वामनेत्रं नश्यति । ग्रहणकालिकसूर्यलग्ने एवं शनैश्चरमङ्गलौ त्रिकणस्थौ यदि भवतः तदा जन्मान्धः योगः ।[5] सूर्यशुक्राभ्यां सह द्वितीयेशः द्वादशेशश्च षष्ठे, अष्टमे अथवा द्वादशभावे भवेयुः तदा जातकः जन्मकालादैव चक्षुरहिताः भवति ।

**(ख) दक्षिणकाणयोगाः** - मन्देऽर्ये दक्षनेत्रघातः ।[6] द्वितीयस्थः शनैश्वरदक्षिणनेत्रं नश्यति ।

**(ग) दम्पत्तीकाणयोगः -** चन्द्रः द्वादशगतस्तथा सूर्यः षष्ठस्थः भवेत् उभावपि अशुभग्रहैर्युतौ निरीक्षितौ भवेतां तदोत्पन्नः जातकः भार्यया सह काणो भवति ।[7]

3. **नेत्रविकलादियोगाः -** विकलनयनो अर्थात् यस्य नेत्रयोः विकलता स्यात् अथवा दर्शनयोग्ये सत्यपि व्रण-पिहगादि वैकल्यं स्यात् तदा अयं विकारः कथ्यते । निम्नलिखिता सन्ति नेत्रविकल्पता मन्दलोचनः, बुद्बुदाक्षः, नेत्रपीडा वक्रनेत्र इति । सूर्यः द्वादशे तिष्ठेत्तदा विकल्पनयनः भवति ।

**(क) मन्दलोचनः -** यस्य नेत्रयोः ज्योतिरल्पं स्याद् दर्शने कष्टः भवेद्वासः मन्दलोचनः । यथा धने व्यये वा शुक्रे पापयुते काणे वा मन्दलोचनः, शुक्रः पापग्रहैर्युक्तः द्वितीयभावे द्वादशभावे वा स्थितः स्यात् तदा जातकः मन्दलोचनो भवति ।

**(ख) बुद्बुदनेत्रयोगः -** यस्य नेत्रे वारम्वारं जलेन फरिते तथा लघ्वाकारो भवतः सः बुद्बुद्धेत्ररोगी भवति। कर्कलाघनस्थिते सूर्ये उत्पन्नः जातकः बुद्बुद्धेत्रपीडितः भवति ।[8]

---

2 **जातकतल्पम् प्रकीर्ण २६७ । (ज्ञेन्दु त्रिके शास्त्रान्धः) ।**

3 **तत्रैव (भौमाख्ये वामनेत्रध्यातः)**

4 **ज्ञा.त. प्रकीर्ण २२४ । (व्ययग्रहगतश्चन्द्रो वाम हिनस्त्यपरं रविः) ।**

5 **जातकतत्त्वम् प्रकीर्ण २३६ (सूर्ये राहुः ग्रसतेरङ्गो मन्दरो त्रिकोणे जन्मान्धः)।**

6 **भावकौतुहलं भावपञ्चदशोऽध्याय ४ श्लोक ।**

7 **व्ययारिगौ चन्द्रर्को दम्पती काणौ (ज.त.) जातकलङ्कारः द्वितीयरध्यायः, ६ श्लोकः) ।**

8 **कर्णिके लग्नगे बुद्बुदाक्षः (जातकतत्त्वम् प्र.प्र.विवेकः २६७)**

**© Association of Academic Researchers and Faculties (AARF)**

**(ग) नेत्रपीडारोगयोगः** – लग्ने वा अष्टमभावगतः शुक्र यदि अशुभग्रहैर्दृष्टः स्यात्तदा अश्रुपाते नेत्रयोः पीडा भवति ।[9] द्वितीयेशः शुक्रयुतो शुक्रात् त्रिकस्थो वा लग्ने शयुक्तौ भवेत् तदा उत्पन्नजातकः नेत्ररोगी भवति ।

**4. रात्र्यन्धरोगः** – रात्र्यन्धो अर्थात् यः रात्रौ दर्शने अक्षमो भवति प्रकाशकाले तस्य सम्यग् रूपेण वस्तुदर्शनं भवति परञ्च प्रकाशाभावे पूर्णतया वस्तुदर्शनं कर्तुमसमर्थी भवति । अस्य रोगस्य विषये यथोक्तं जातकतल्पे ।[10] शुक्रेण मुक्तश्चन्द्रः यदि त्रिकस्थः स्यात् तदा जातकः रात्र्यन्धः भवति ।

**5. दृष्टिदोषयोगः -** त्रिकोणे सूर्ये पापदृष्टे निस्तेजो नेत्रः ।[11] त्रिकोणस्थः सूर्यः यदि पापग्रहान् दृष्टो भवेत्तदा जातकः ज्योतिर्विहीनः निस्तेजो वा भवति ।'

ज्योतिः शास्त्रे जातकग्रन्थेषु च नेत्ररोगाणां वर्णनं प्रमुखतया समुपलभ्यन्ते । अन्ततो गत्वा वक्तुं शक्यते यत् ज्योतिषशास्त्रैः तेषां रोगाणां पूर्वानुमानं कृत्वा शास्त्रोक्तनिदानं च विधाय मानवः स्वकीय जीवनस्य सर्वक्रिया सुचारुरूपेण सम्पादयितुमक्षमयो भविष्यतीति । अतः नेत्ररोगनिर्धारणे निवारणे च ज्योतिषशास्त्रस्यातीव महत्त्वपूर्णभूमिका विद्यते ।

---

[9] **लग्नाष्टमे शुक्रे क्रूरदृष्टे अश्रुपातानेत्रपीडा ।**

[10] **सेन्दुः शुक्रस्त्रिकस्थो निशान्धकः (जातकलत्रम् प्रकीर्ण २६३) ।**

[11] **जा.त.प्र. २४२**

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.